### शासनसम्राट्-श्रीविजयनेमिसूरीश्वरजी-विरचिता

# अनेकान्ततत्त्वमीमांसा

**सं. मुनि त्रैलोक्यमण्डनविजय**

परमगुरु तपगच्छाधिपति श्रीविजयनेमिसूरिजी म. (वि.सं. १९२९-२००५) जैनशासनना धोरीपुरुष हता. तेओश्रीअे शासनप्रभावनानां अनूठां कार्योनी साथे साथे श्रुतोपासनानां पण रूडां कार्यो कर्यां हतां. तेओश्री अद्भुत मेधा अने कठोर परिश्रमने लीधे स्वयं अनेक विद्याशाखाओना पारगामी बन्या हता अने शिष्योने पण संगीन अभ्यास करावी विद्वन्मूर्धन्य बनाव्या हता. परमगुरु अने तेओना शिष्यपरिवार पासेथी जैनसंघने घणा घणा प्राचीन-ग्रन्थोना संशोधन-सम्पादन-विवेचन व. सांपड्यां. श्रीहरिभद्रसूरिजी, उपा. श्रीयशोविजयजी जेवा महापुरुषोना ग्रन्थोना अध्ययननी परिपाटी श्रमणसंघमां पुनः प्रस्थापित करवानो यश, जो वास्तविक रीते कोईने घटतो होय तो ते आ परिवारने ज छे.

परमगुरु तथा तेओना शिष्यवृन्द द्वारा नूतन ग्रन्थोनुं सर्जन पण विपुल प्रमाणमां थयुं. स्वयं परमगुरुअे ज सप्तभङ्गीप्रभा, न्यायसिन्धु, न्यायालोकटीका, न्यायखण्डखाद्यटीका जेवा उत्तमोत्तम ग्रन्थोनी रचना करी छे. जैनन्याय अने जैनप्रमाणचर्चा साथे सम्बन्धित प्रस्तुत कृति पण तेओश्रीनी ज रचना छे.

अनेकान्ततत्त्वमीमांसा अे नाम सूचवे छे तेम, आ ग्रन्थमां स्याद्वादनी चर्चा तो छे ज; पण अेनी साथे ने साथे आ स्याद्वादतत्त्वने समजवानां साधनो-प्रमाण, नय अने निक्षेपनी पण विशद छणावट छे. षड्द्रव्यनी विचारणा पण विस्तारथी करवामां आवी छे. वस्तुतः आ समग्र कृतिमां स्याद्वादनुं स्वतन्त्र निरूपण छे ज नहीं, पण स्थाने स्थाने तेनुं निरूपण सांकळी लेवायुं छे अने अे ज आनी खूबी छे. सूत्रात्मकशैलीनो आ ग्रन्थ ४ अध्याय, १६ पाद अने ३४७ सूत्रोमां वहेंचायेलो छे, जेनी तालिका भूमिकाने अन्ते मूकी छे.

खूब ओछा शब्दोमां वस्तुछणावट अने पूर्वसूत्रोनां पदोनी उत्तरसूत्रोमां अनुवृत्ति अे बे सूत्रात्मक ग्रन्थनी विशेषता होय छे. अने तेमां पण प्रस्तुत कृतिमां तो अेना कर्ताना प्रगाध पाण्डित्यनी छाप गहन रीते पडी छे. अेटले

मारा जेवा बाळ जीवो माटे आ कृतिनां सूत्रोनुं तात्पर्य तो ठीक, सामान्य शब्दार्थ पण समजवो अघरो छे. छतां पण समग्र कृति लखतां–अवलोकतां पूर्वना कोईक महर्षिनी महान रचना होय अेवी अनुभूति सतत थई छे.

आ ग्रन्थनी स्वोपज्ञ टीका हती अेवी नोंध मळे छे पण अत्यारे तो अे उपलब्ध नथी. मूळ कृति पण सचवाई ते पूज्य गुरुभगवन्त आचार्य श्रीविजयशीलचन्द्रसूरिजी म.नी काळजीने आभारी छे. तेओअे आ कृतिनो लांबा फूलस्केप बारेक कागळ पर पेन्सिलथी लखायेलो काचो खरडो वर्षोथी जतनपूर्वक साचवी राख्यो हतो. आ खरडामां जूनी लिपिमां सूत्रो लखवामां आव्या छे अने त्यारबाद अनेक सुधारा–वधारा, सूत्रोनी वधघट, विषयविभाग व. करवामां आव्या छे.

आ कृति पोताना विषयनी अेक समग्र कृति छे. बहु ओछी कृतिओ आवुं पूर्णत्व धरावती होई शके. आनां सूत्रोनी विशिष्ट रचनाशैली, अन्य प्रमाणशास्त्रो साथे अेनी तुलना, कर्तानो मौलिक उन्मेष, अनेकान्ततत्त्व व. विशे विस्तृत विवेचन लखवानो मारो ख्याल हतो. परन्तु तेवा विशिष्ट अभ्यासना अभावे अे साहसथी विरमवानुं उचित लाग्युं छे. अत्यारे तो मूळ कृतिना काचा खरडाने सुग्रथित स्वरूपमां अभ्यासीओ सामे मूकीने सन्तोष मानी लीधो छे. अर्थना अनवबोधने लीधे थयेली भूलो तरफ ध्यान दोरवा विद्वानोने विनन्ति. परमगुरुनी अेक अप्रगट कृति सौप्रथम वखत प्रकाशित थई रही छे तेने अनेरो आनन्द छे.

## तालिका

| अध्याय | पाद | सूत्रसंख्या | | विषय |
|---|---|---|---|---|
| १ | १ | १३ | **५९** | प्रमाणसामान्यलक्षण |
| | २ | १५ | | प्रमाणस्वरूपादिविप्रतिपत्तिनिराकरण |
| | ३ | १९ | | ,, |
| | ४ | १२ | | लक्षणस्वरूप |
| २ | १ | ५१ | **१३७** | प्रत्यक्षप्रमाण |
| | २ | ३८ | | अनुमानादिप्रमाण |
| | ३ | २१ | | आगमप्रमाण |
| | ४ | २७ | | प्रमाणाभास |
| ३ | १ | १९ | **६१** | नयस्वरूप |
| | २ | १५ | | नयाभास |
| | ३ | १५ | | निक्षेपस्वरूप |
| | ४ | १२ | | कथास्वरूप |
| ४ | १ | १६ | **९०** | द्रव्यसंख्यानियमन |
| | २ | १८ | | आकाशादिद्रव्यस्वरूप |
| | ३ | ३६ | | जीव-सप्ततत्त्वस्वरूप |
| | ४ | २० | | पुद्गलस्वरूप |
| --- | --- | --- | | |
| **४** | **१६** | **३४७** | | |

# अनेकान्ततत्त्वमीमांसा

## ॥ अथः प्रथमोऽध्यायः ॥

अथाऽनेकान्ततत्त्वमीमांसा ॥१.१.१॥
प्रमाण-नय-निक्षेपतस्तत्त्वावधारणम् ॥१.१.२॥
वस्तुव्यवसायि ज्ञानं प्रमाणम् ॥१.१.३॥
समारोपविरोधात् प्रामाण्याद् वा ॥१.१.४॥
स्वपरावगाहित्वं तु समानम् ॥१.१.५॥
नाऽर्थोपलब्धिहेतुर्विकल्पासहत्वात् ॥१.१.६॥
नाऽनधिगतार्थाधिगन्तृ तत्त्वानुभूतिर्वा, स्मृत्यव्याप्तेः ॥१.१.७॥
सम्यगर्थनिर्णयस्तु नोक्तादन्यः ॥१.१.८॥
तद्वति तज्ज्ञानमित्यप्यनर्थान्तरम् ॥१.१.९॥
नैवं समारोपः ॥१.१.१०॥
विपर्यय-संशया-ऽनध्यवसायास्तु तद्विशेषाः ॥१.१.११॥
प्रामाण्यं त्वस्योत्पत्तौ परतः, ज्ञाने स्वतः परतश्चाऽप्रामाण्यवत् ॥१.१.१२॥
जनि-ज्ञप्ति-फलेषु स्वत एवेति प्रतिबन्दिपराहतमिति ॥१.१.१३॥

॥ इति [प्रथमाध्याये] प्रथमः पादः ॥

ज्ञानमात्रं, भ्रमाभावात् ॥१.२.१॥
न, हेत्वसिद्धेः ॥१.२.२॥
वस्त्वसिद्धेर्नैवम् ॥१.२.३॥
न, बाधकाभावात् साधकसद्भावाच्च ॥१.२.४॥
न निर्विकल्पाव्याप्तिरलक्ष्यत्वात् ॥१.२.५॥
लक्ष्यासिद्ध्याऽसम्भव इति न, व्यवहारतस्तत्सिद्धेः ॥१.२.६॥
स्वीकारतिरस्कारोपेक्षास्तु तद्विशेषाः ॥१.२.७॥
कार्यकारणभावाभावान्नोक्ताऽसिद्धिः ॥१.२.८॥
नाऽवधेर्नियमात् ॥१.२.९॥
स्वभावादितस्तु न प्रतिनियमः ॥१.२.१०॥
ग्राह्यग्राहकभावविधुरमेव तत् ॥१.२.११॥

न, प्रतिकर्मव्यवस्थाद्यनुपपत्तेः ॥१.२.१२॥
विचारासहत्वाच्छून्यमेवेति ॥१.२.१३॥
न, तदतद्भ्यां हेतोरनुपपत्तेः ॥१.२.१४॥
एतेनाऽनिर्वचनीयतावादः प्रत्युक्त इति ॥१.२.१५॥

॥ इति [प्रथमाध्याये] द्वितीयः पादः ॥

प्रकृतिविकारस्य महतो वृत्तिस्तत् ॥१.३.१॥
न, तत्प्रक्रियाया एवाऽभावात् ॥१.३.२॥
नाऽतोऽविद्याऽन्तःकरणवृत्तिः ॥१.३.३॥
नाऽऽधारमात्रं, साधारोपलब्धेः ॥१.३.४॥
नाऽऽधारव्यतिरिक्तमेव, सम्बन्धानुपपत्तेः ॥१.३.५॥
न स्वस्वरूपमात्रप्रतिष्ठितं, व्यतिरेकात् ॥१.३.६॥
अविष्वग्भूतं त्वात्मनः ॥१.३.७॥
न प्राग् सदेव, व्यापारवैयर्थ्यात् ॥१.३.८॥
नाऽसदेव, उत्पत्त्यनुपपत्तेः ॥१.३.९॥
सदसद्वादस्तु सद्वादः ॥१.३.१०॥
न विरोधोऽपेक्षोक्तेः ॥१.३.११॥
अस्तु सर्वदाऽनावृतमेव ॥१.३.१२॥
[न,(?)] सर्वस्य सर्वज्ञत्वाप्तेः संशयाद्यनुपपत्तेश्च ॥१.३.१३॥
न प्रतिनियतविषयत्वमविनिगमात् ॥१.३.१४॥
हेतुस्तु क्षयोपशमादावुपकरोति ॥१.३.१५॥
नाऽऽवृतमेव, स्वभावप्रच्युतेः ॥१.३.१६॥
उक्तस्य केवलादन्यत्राऽसम्भवः ॥१.३.१७॥
नाऽभेदश्रयणादनेकान्तात्मवस्तुप्रतिभासात् ॥१.३.१८॥
भेदाश्रयणे त्वंशप्रथनान्नयोऽपीति ॥१.३.१९॥

॥ इति [प्रथमाध्याये] तृतीयः पादः ॥

स्वरूपोक्तेर्नेदं लक्षणम् ॥१.४.१॥
न, स्वरूप-तटस्थाभ्यां तद्भेदात् ॥१.४.२॥
न निष्प्रयोजनं, व्यावृत्तिप्रतीतेः ॥१.४.३॥

न सिद्धता, सामान्य-विशेषाभ्यामवगमवैलक्षण्यात् ॥१.४.४॥

अत एव नाऽऽत्माश्रयादिरनेकान्तत्वाच्च ॥१.४.५॥

नाऽनवस्थानादुपेक्षा, जिज्ञासोपरमात् ॥१.४.६॥

रूढि-योगाभ्यां लक्ष्योक्तेरुभयावगतिः ॥१.४.७॥

नाऽतिव्याप्तेः ॥१.४.८॥

सङ्केतं विनाऽसत्कल्पः सम्बन्धः ॥१.४.९॥

नांऽशेऽपि पातादत्यापत्तिः, विशिष्टस्य कथञ्चिद्भेदात् ॥१.४.१०॥

नाऽन्यत्र प्रामाण्यमनुपस्थितेः ॥१.४.११॥

नाऽननुगमादव्याप्तिर्भेदात् कथञ्चिदनुगमाद् वेति ॥१.४.१२॥

॥ इति [प्रथमाध्याये] तुर्यः पादः ॥

॥ इति प्रमाणसामान्यस्वरूपनिरूपणाख्यः प्रथमोऽध्यायः ॥

## ॥ अथ द्वितीयोऽध्यायः ॥

प्रत्यक्ष-परोक्षाभ्यां द्वेधा ॥२.१.१॥

प्रत्यक्षमेकं, प्रत्यक्षा-ऽनुमाने द्वे, प्रत्यक्षा-ऽनुमानो-पमानानि त्रीणि, प्रत्यक्षा-ऽनुमानाऽऽगमास्त्रयं, प्रत्यक्षा-ऽनुमानो-पमाना-ऽऽगमाश्चत्वारः, प्रत्यक्षा-ऽनुमानो-पमाना-ऽऽगमा-ऽर्थापत्तयः पञ्च, प्रत्यक्षा-ऽनुमानो-पमाना-ऽऽगमा-ऽर्थापत्त्य-नुपलब्धयः षडित्यादयस्त्वसद्वादाः ॥२.१.२॥

स्पष्टमाद्यम् ॥२.१.३॥

मानान्तरानपेक्षत्वं विशेषावभासनं वा तत्त्वम् ॥२.१.४॥

नेन्द्रियार्थप्राप्तिजं, चक्षुर्मनसोरप्राप्यकारित्वात् ॥२.१.५॥

नेन्द्रियजं, मनसोऽनिन्द्रियत्वादवध्याद्यव्याप्तेश्च ॥२.१.६॥

अत एव नाऽर्थजम् ॥२.१.७॥

ज्ञानाकरणकन्तु नोक्तादन्यत् ॥२.१.८॥

विषयत्वे तन्त्रं न क्षयोपशमादिभ्योऽन्यत् ॥२.१.९॥

न निर्विकल्पकमेव, मानत्वासिद्धेः सविकल्पकस्यैव तथानुभवाच्च ॥२.१.१०॥

न चैतन्यानामेकलोलीभावोऽसिद्धेः ॥२.१.११॥

सांव्यवहारिक-पारमार्थिकाभ्यां द्विविधमेतत् ॥२.१.१२॥

न लौकिका-ऽलौकिकाभ्यामलौकिकासत्तेरभावात् ॥२.१.१३॥

इन्द्रियजा-ऽनिन्द्रियजाभ्यामाद्यं द्विधा ॥२.१.१४॥

अत्र द्रव्येन्द्रियं गृह्यते, न भावेन्द्रियम् ॥२.१.१५॥

निर्वृत्युपकरणाभ्यां द्रव्येन्द्रियं लब्ध्युपयोगाभ्यां भावेन्द्रियं द्वेधा ॥२.१.१६॥

स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्राणि पञ्च द्रव्येन्द्रियाणि ॥२.१.१७॥

न वाक्-पाणि-पाद-पायू-पस्थानि ॥२.१.१८॥

न च भौतिकानि ॥२.१.१९॥

स्पर्शनं पृथ्व्यप्तेजोवायुवनस्पतीनां, स्पर्शन-रसने कृम्यादीनां, स्पर्शन-रसन-घ्राणानि पिपीलिकादीनां, स्पर्शन-रसन-घ्राण-चक्षूंषि भ्रमरादीनां, पञ्चाऽपि नारक-तिर्यङ्-नरा-ऽमराणाम् ॥२.१.२०॥

स्पर्श-रस-गन्ध-वर्ण-शब्दप्रतिनियतार्थानि तानि ॥२.१.२१॥

अनिन्द्रियं मनोऽनियतार्थम् ॥२.१.२२॥

अप्राप्यकारित्वं चक्षुर्मनसोः समानम् ॥२.१.२३॥

अवग्रहेहा-ऽवाय-धारणाभिश्चतुर्भेदमेकशः ॥२.१.२४॥

व्यञ्जना-ऽर्थाभ्यामवग्रहो द्विधा ॥२.१.२५॥

न चक्षुर्मनसोर्व्यञ्जनं, न च मानम् ॥२.१.२६॥

दर्शनद्वाराऽर्थेन्द्रियसन्निपातजोऽवान्तरसामान्यविशिष्टावभास्यवग्रहः ॥२.१.२७॥

ईहान्तं दर्शनमित्यपि ॥२.१.२८॥

तद्गृहीतार्थैकविशेषतर्कणमीहा ॥२.१.२९॥

तर्कितार्थे विशेषनिष्टङ्कनमवायः ॥२.१.३०॥

दृढतमो धारणा ॥२.१.३१॥

क्षय-क्षयोपशमविशेषादात्ममात्रप्रभवं पारमार्थिकम् ॥२.१.३२॥

तद् द्विविधं विकल-सकलभेदात् ॥२.१.३३॥

आद्यमवधि-मनःपर्यवाभ्यां द्विधा ॥२.१.३४॥

तत्राऽऽद्यो रूपिद्रव्यविषयो भव-गुणप्रत्ययाभ्यां द्विधा ॥२.१.३५॥

सुर-नारकाणामाद्योऽन्तिमो नर-तिरश्चां षड्भेदः ॥२.१.३६॥

द्वितीयो मनोद्रव्यपर्यायालम्बन ऋजु-विपुलमतिभ्यां द्विधा ॥२.१.३७॥

स्वावरणक्षयोपशमविशेषप्रभवत्वं तूक्तानां समानम् ॥२.१.३८॥

सांव्यवहारिकस्याऽवधेश्च विपर्ययो, न शेषयोः ॥२.१.३९॥

सकलमशेषघातिक्षयसमुत्थं केवलम् ॥२.१.४०॥

तच्चाऽशेषविशेषप्रकाशकमप्रतिबन्धात् ॥२.१.४१॥
अशेषसामान्यविषयकमिदमेव केवलदर्शनमित्येके ॥२.१.४२॥
एतत्समकालं सामान्यावगाहि दर्शनमन्यदित्यन्ये ॥२.१.४३॥
भिन्नकालं तदित्यपरे ॥२.१.४४॥
लङ्घनतापादेरिव नाऽस्याऽत्यन्तं प्रकर्षः ॥२.१.४५॥
नोभयोर्वैषम्यात् ॥२.१.४६॥
नेष्टमात्रगं हेतोरविशेषात् ॥२.१.४७॥
सिद्धिस्तु प्रमेयत्वादेः ॥२.१.४८॥
न च नित्यमेवेदं, जगत्कर्तुरसिद्धेः ॥२.१.४९॥
निर्दोषोऽर्हन्नेव तद्वान्, न बुद्धादिः ॥२.१.५०॥
तस्य च कवलाहारो न विरुद्ध [इति] ॥२.१.५१॥

॥ इति द्वितीयाध्याये प्रथमः पादः ॥

अस्पष्टं द्वितीयम् ॥२.२.१॥
स्मृत्यभिज्ञानोहानुमानागमैस्तत् पञ्चधा ॥२.२.२॥
संस्कारमात्रजा स्मृतिः ॥२.२.३॥
विषय-प्रमात्वयोः पारतन्त्र्येऽपि प्रामाण्यमनुमानवत् ॥२.२.४॥
सङ्कलनमभिज्ञानम् ॥२.२.५॥
तत्तोल्लेखोऽनयोस्समान इदमो(न्तो)ल्लेखोऽनुभवस्मृतिजत्वं च विशेषः ॥२.२.६॥
नोपमानाद्यस्मादन्यत् ॥२.२.७॥
नाऽध्यक्षं, साक्षादक्षाननुविधानात् ॥२.२.८॥
नोभयमेव, एकस्याऽपूर्वस्य प्रथनात् ॥२.२.९॥
व्याप्ति-वाच्यवाचकभावान्यतरावगाही तर्क ऊहः ॥२.२.१०॥
अन्वय-व्यतिरेकग्रहणाभ्याम् ॥२.२.११॥
न प्रसङ्गात्मा ॥२.२.१२॥
व्याप्तिरत्राऽन्तर्व्याप्तिर्न बहिर्व्याप्तिः ॥२.२.१३॥
कार्यकारणा(ण)भावादिप्रतिबन्धतोऽन्यथानुपपत्तिराद्या ॥२.२.१४॥
सहचारमात्रतो नियमो द्वितीया ॥२.२.१५॥

लिङ्गज्ञानकरणकं पक्षे साध्यज्ञानमनुमानम् ॥२.२.१६॥

व्यापारो व्याप्तिस्मृतिर्न परामर्शादिः ॥२.२.१७॥

स्वार्थमेतत् ॥२.२.१८॥

लिङ्गमन्यथानुपपत्त्येकरूपं, न त्रिरूपादि ॥२.२.१९॥

तदुपलब्ध्यनुपलब्धिभ्यां द्विधा ॥२.२.२०॥

तद् द्वयं विरुद्धा-ऽविरुद्धाभ्यां द्विविधम् ॥२.२.२१॥

अविरुद्धोपलब्धि-विरुद्धानुपलब्धिभ्यां विधिसिद्धिर्विरुद्धोपलब्ध्यविरुद्धानु-पलब्धिभ्यां च निषेधसिद्धिः ॥२.२.२२॥

तत्राऽविरुद्धोपलब्धिर्व्याप्य-कार्य-कारण-पूर्वचरो-त्तरचर-सहचरैः षोढा ॥२.२.२३॥

स्वभावविरुद्ध-विरुद्धव्याप्य-कार्य-कारण-पूर्वचरो-त्तरचर-सहचरैर्विरुद्धोपलब्धिः सप्तधा ॥२.२.२४॥

विरुद्धकार्य-कारण-स्वभाव-व्यापक-सहचरानुपलम्भैर्विरुद्धानुपलब्धिः पञ्चधा ॥२.२.२५॥

स्वभाव-व्यापक-कार्य-कारण-पूर्वचरो-त्तरचर-सहचरानुपलब्धिभिरविरुद्धा-नुपलब्धिः सप्तधा ॥२.२.२६॥

न तु स्वभाव-कार्या-ऽनुपलब्धिभिस्त्रिप्रकारमेव, कारणाद्यसङ्ग्रहात् ॥२.२.२७॥

प्रमाणविकल्पोभयतः प्रसिद्धो धर्मी पक्षः ॥२.२.२८॥

यद् विना लिङ्गं नोपपद्यते तत् साध्यम् ॥२.२.२९॥

अप्रतीता-ऽनिराकृता-ऽभीप्सितत्वानि तस्य सिद्धा[व]नुगुणानि ॥२.२.३०॥

पक्षहेतुवचनाद्यात्मकं परार्थमुपचारात् ॥२.२.३१॥

व्युत्पन्नमतीन् प्रति द्वावेव प्रतिज्ञाहेतू, मन्दमतीन् प्रति तु प्रतिज्ञा-हेतू-दाहरणो-पनय-निगमनानि पञ्चाऽप्यवयवाः प्रयोक्तव्याः ॥२.२.३२॥

प्रतिज्ञादित उदाहरणादितो वा त्रय एवोदाहरणोपनयौ द्वावेव, पञ्चाऽप्यवयवाः प्रयोक्तव्या इत्येकान्ते मानाभावः ॥२.२.३३॥

साध्यवत्तया धर्मिणो वचनं प्रतिज्ञा ॥२.२.३४॥

पञ्चम्यन्तस्य तृतीयान्तस्य वा लिङ्गस्य हेतुः ॥२.२.३५॥

प्रतिबन्धप्रदर्शनपुरस्सरं साधर्म्यतो वैधर्म्यतो वा दृष्टान्तस्योदाहरणम् ॥२.२.३६॥

पक्षे लिङ्गस्योपसंहार उपनयः ॥२.२.३७॥
साध्यस्याऽबाधिततया पुनर्निगमनमिति ॥२.२.३८॥

॥ इति द्वितीयाध्याये द्वितीयः पादः ॥

आप्तवचनोत्थमागमः ॥२.३.१॥
आप्तो यथादृष्टवक्ता ॥२.३.२॥
लौकिक-लोकोत्तराभ्यामाप्तो द्विधा ॥२.३.३॥
आद्यः पित्रादिर्द्वितीयस्तीर्थकरादिः ॥२.३.४॥
वर्णपदवाक्यं वचनं पौद्गलिकमेव ॥२.३.५॥
न गुण, आगत्याद्यनुपपत्तेः ॥२.३.६॥
नित्यं द्रव्यं परार्थत्वान्नोत्पत्तिविपत्तितः ॥२.३.७॥
न, नादोपाधेर्व्यतिरिक्तस्याऽसिद्धेः ॥२.३.८॥
अभिव्यक्तिर्न विचारसहा ॥२.३.९॥
अभिज्ञानं नाऽनाभासम् ॥२.३.१०॥
वर्णाः प्रतीताः, तेषामानुपूर्वीविशेषः पदं, पदानां वाक्यम् ॥२.३.११॥
अर्थे स्वाभाविकः प्रत्यायनशक्तिस्तत्सम्बन्धः ॥२.३.१२॥
शक्तिस्त्वन्यत्राऽप्यावश्यकी ॥२.३.१३॥
तदभिव्यञ्जकः सङ्केतो न सम्बन्धो, वाच्यवाचकभावनियमानुपपत्तेः ॥२.३.१४॥
यथार्थत्वा-ऽयथार्थत्वे त्वस्य वक्तृदोषगुणापेक्षे ॥२.३.१५॥
विधि-निषेधाभ्यां सर्वत्र सप्तभङ्गीमनुसरति ॥२.३.१६॥
क्रमयौगपद्यतो विधिनिषेधकल्पनतः स्यात्काराङ्कितानामेवकारजुषां सर्वमस्तीति नाऽस्तीत्यस्ति नाऽस्ति चेत्यवक्तव्यमित्यस्त्यवक्तव्यमिति नाऽस्त्यवक्तव्य-मित्यस्ति नाऽस्ति चाऽवक्तव्यमिति भङ्गानां सप्तानामेव भावात् ॥२.३.१७॥
प्रतिपर्यायं धर्म-तत्संशय-जिज्ञासा-पर्यनुयोगानां सप्तानामेव भावात् तथाभावः ॥२.३.१८॥
प्रतिभङ्गं सकल-विकलादेशस्वभावा सप्तभङ्गी ॥२.३.१९॥
कालादिभिरष्टभिरभेदवृत्तितोऽनन्तधर्मात्मकवस्तुनो यौगपद्येनाऽभिधायकं वचः सकलादेशो, विपरीतमतो विकलादेशः ॥२.३.२०॥

आद्यं प्रमाणवाक्यं, द्वितीयं नयवाक्यमिति ॥२.३.२१॥

॥ इति द्वितीयाध्याये तृतीयः पादः ॥

प्रमाणप्रसाध्यं फलमानन्तर्य-पारम्पर्याभ्यां द्विधा ॥२.४.१॥
अज्ञाननिवृत्तिराद्यं सर्वेषाम् ॥२.४.२॥
केवलस्यौदासीन्यमन्येषामुपादानहानोपेक्षाबुद्धयो द्वितीयम् ॥२.४.३॥
प्रमाणतः प्रमातुश्च भिन्नमभिन्नं च तत्, तत्त्वान्यथानुपपत्तेः ॥२.४.४॥
प्रमाणस्य स्वरूपादिविपरीतस्तदाभासः ॥२.४.५॥
स्वरूप-विषय-फल-सङ्ख्याभासतश्चतुर्द्धा ॥२.४.६॥
आद्योऽज्ञानाद्यात्मकः ॥२.४.७॥
प्रत्यक्षाभासादिस्त्वस्य प्रपञ्चः ॥२.४.८॥
केवल-मनःपर्यववर्जं प्रत्यक्षवदवभासमानं ज्ञानं प्रत्यक्षाभासम् ॥२.४.९॥
अननुभूते स्मरणाभासम् ॥२.४.१०॥
तुल्यादौ सङ्कलनाभासम् ॥२.४.११॥
अन्यथोपपत्तौ तर्काभासम् ॥२.४.१२॥
पक्षाभासादिजमनुमानाभासम् ॥२.४.१३॥
पक्षाभास-लिङ्गाभास-दृष्टान्ताभासो-पनय-निगमनाभासाः पञ्च ॥२.४.१४॥
आद्यः प्रतीत-निराकृता-ऽनभीप्सितसाध्यविशेषणैस्त्रिधा ॥२.४.१५॥
निराकरणञ्च साध्यस्य प्रत्यक्षानुमानादिभिः ॥२.४.१६॥
द्वितीयोऽसिद्ध-विरुद्धा-ऽनैकान्तिकभेदतस्त्रिप्रकारः ॥२.४.१७॥
असिद्धान्यथानुपपत्तिकोऽसिद्धः ॥२.४.१८॥
सोऽन्यरो(?न्यो)भयासिद्धाभ्यां द्विप्रकारः ॥२.४.१९॥
साध्यविपर्ययान्यथानुपपत्तिको विरुद्धः ॥२.४.२०॥
अन्यथानुपपत्तिविकलोऽनैकान्तिकः ॥२.४.२१॥
निर्णीत-सन्दिग्धविपक्षवृत्तिकभेदाद् द्विधा ॥२.४.२२॥
साधर्म्य-वैधर्म्याभ्यां द्विप्रकारो दृष्टान्ताभासः ॥२.४.२३॥
साध्यविकल-लिङ्गविकल-तदुभयविकल-सन्दिग्धसाध्य-सन्दिग्धलिङ्ग-सन्दिग्धोभया-ऽनन्वया-ऽप्रदर्शितान्वय-विपरीतान्वयैराद्योऽसिद्धसाध्याभावा-ऽसिद्धलिङ्गाभावाऽसिद्धाभाववद्द्वय-सन्दिग्धसाध्याभाव-सन्दिग्धलिङ्गाभाव-

सन्दिग्धाभाववद्द्वया-ऽव्यतिरेका-ऽप्रदर्शितव्यतिरेक-विपरीतव्यतिरेकै-
द्वितीयश्च नवधा ॥२.४.२४॥
उक्तविपरीते उपनय-निगमनाभासे ॥२.४.२५॥
अनाप्तोक्तजं ज्ञानमागमाभासम् ॥२.४.२६॥
विषयाभासादयस्तूक्तविपरीता इति ॥२.४.२७॥

॥ इति द्वितीयाध्याये तुर्यः पादः ॥

॥ इति [प्रमाणविशेषनिरूपणाख्यो] द्वितीयोऽध्यायः ॥

**॥ अथ तृतीयोऽध्यायः ॥**

अंशान्तराप्रतिक्षेपी वस्त्वंशमात्रग्राही अभिप्रायविशेषो नयः ॥३.१.१॥
न प्रमाणमेव, स्वरूपादिभेदात् ॥३.१.२॥
स नैगम-सङ्ग्रह-व्यवहार-र्जुसूत्र-शब्द-समभिरूढैवम्भूतभेदतः सप्तधा ॥३.१.३॥
समभिरूढैवम्भूतयोः शब्द एवाऽन्तर्भावात् पञ्च नया इत्येके ॥३.१.४॥
सङ्ग्रहस्याऽपि नैगमेऽनुप्रवेश इति चत्वार इत्यपरे ॥३.१.५॥
आद्यास्त्रयो द्रव्यार्थिकाश्चत्वारोऽन्तिमाः पर्यायार्थिकाः ॥३.१.६॥
ऋजुसूत्रस्याऽपि द्रव्यार्थिकत्वमित्येके ॥३.१.७॥
सामान्यविशेषोभयादिग्राही परामर्शो नैगमः ॥३.१.८॥
स प्रधानोपसर्जनभावेन धर्मद्वय-धर्मिद्वय-धर्मधर्म्युभय-गोचरत्वतस्त्रिधा ॥३.१.९॥
सामान्यमात्रगोचरः सङ्ग्रहः ॥३.१.१०॥
परापरभेदाद् द्विधा ॥३.१.११॥
आद्यः सत्त्वाख्यपरसामान्यग्राही, द्वितीयस्तु द्रव्यत्वाद्यवान्तरसामान्यग्राही ॥३.१.१२॥
विधिपूर्वक-सङ्ग्रहगृहीतार्थविभाजको व्यवहारः ॥३.१.१३॥
प्राधान्येन वर्त्तमानक्षणस्थायि-पर्यायमात्रग्राही ऋजुसूत्रः ॥३.१.१४॥
कालादिभेदाच्छब्दस्याऽर्थभेदाभ्युपगन्ता शब्दः ॥३.१.१५॥
व्युत्पत्तिनिमित्तभेदतः पर्यायशब्दार्थभेदाभ्युपगन्ता समभिरूढः ॥३.१.१६॥
व्युत्पत्तिनिमित्तक्रियाविष्टा-ऽर्थवाच्यत्वाभ्युपगन्ता एवम्भूतः ॥३.१.१७॥
पूर्वपूर्वेषामधिकविषयत्वमुत्तरोत्तरेषां न्यूनविषयत्वं चैषु समानम् ॥३.१.१८॥
पूर्वे चत्वारोऽर्थनयाः शेषाः शब्दनया इति ॥३.१.१९॥

॥ इति तृतीयाध्याये प्रथमः पादः ॥

अंशान्तरप्रतिक्षेपी वस्त्वंशग्राही नयाभासः ॥३.२.१॥
सर्वथा धर्मद्वयादीनां पार्थक्याभ्युपगन्ता नैगमाभासः कणभक्षादिदर्शनम् ॥३.२.२॥
विशेषप्रतिक्षेपी सामान्यमात्रग्राही सङ्ग्रहाभासः ॥३.२.३॥
सत्प्रधानाद्यद्वैतदर्शनं परो द्रव्यत्वाद्येकान्तवादस्त्वपरः ॥३.२.४॥
अपारमार्थिकद्रव्यपर्यायविभागाभ्युपगन्ता व्यवहाराभासो लोकायतदर्शनम् ॥३.२.५॥
सर्वथा द्रव्यप्रतिक्षेपी क्षणिकपर्यायाभ्युपगन्ता ऋजुसूत्राभासो बौद्धदर्शनम् ॥३.२.६॥
कालादिभेदतो ध्वनेस्सर्वथाऽर्थभेदाभ्युपगन्ता शब्दाभासः ॥३.२.७॥
व्युत्पत्तिभेदेन पर्यायशब्दानां सर्वथाऽर्थभेदाभ्युपगन्ता समभिरूढाभासः ॥३.२.८॥
शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रिययाऽनालिङ्गितस्य वाच्यत्वप्रतिक्षेपी तदालिङ्गित-स्य(स्यैव) वाच्यत्वाभ्युपगन्ता एवम्भूताभासः ॥३.२.९॥
आनन्तर्य-पारम्पर्याभ्यां नयस्य फलमपि द्विधा ॥३.२.१०॥
आद्यं वस्त्वंशाज्ञाननिवृत्तिः, द्वितीयं तदुपादानहानोपेक्षाबुद्धयः ॥३.२.११॥
तन्नयतो भिन्नमभिन्नं च, तत्त्वान्यथानुपपत्तेः ॥३.२.१२॥
आद्यास्त्रयः सविपर्ययमतिश्रुतावधि-मनःपर्यवकेवलज्ञानाश्रयिणः ॥३.२.१३॥
ऋजुसूत्रस्तु मतिवर्जोक्ताश्रयी ॥३.२.१४॥
शब्दादयस्तु त्रयः श्रुतज्ञानकेवलज्ञानाश्रयिण इति ॥३.२.१५॥

॥ इति तृतीयाध्याये द्वितीयः पादः ॥

शब्दार्थरचनाविशेषो निक्षेपः ॥३.३.१॥
अप्रस्तुतार्थनिषेधः प्रस्तुतार्थोपपादनं चाऽस्य फलम् ॥३.३.२॥
एतेनाऽनुयोगाधिगमोपायत्वं व्याख्यातम् ॥३.३.३॥
स नाम-स्थापना-द्रव्य-भावभेदतश्चतुर्धा ॥३.३.४॥
प्रकृतार्थनिरपेक्षो नामार्थान्यतरपरिणामो नामनिक्षेपः ॥३.३.५॥
भावाकारस्थापना स्थापनानिक्षेपः ॥३.३.६॥
स सद्भूता-ऽसद्भूताकारस्थापनाभेदाद् द्विधा ॥३.३.७॥
आद्यो जिनप्रतिमादिः, द्वितीयोऽक्षादौ स्थापनाचार्यादिः ॥३.३.८॥
भूतभाविभावकारणं द्रव्यनिक्षेपः ॥३.३.९॥
विवक्षितक्रियापरिणतिमान् भावनिक्षेपः ॥३.३.१०॥
नयसमुदायवादे चतुर्णामशेषव्यापित्वम् ॥३.३.११॥

नामादिनिक्षेपत्रयं द्रव्यार्थिकनये ॥३.३.१२॥
भावनिक्षेपः पर्यवनये ॥३.३.१३॥
ऋजुसूत्रे नामभावावेवेत्येके ॥३.३.१४॥
सङ्ग्रह-व्यवहारयोः स्थापनावर्जा इत्यन्ये [इति] ॥३.३.१५॥

॥ इति तृतीयाध्याये तृतीयः पादः ॥

उक्तानां कथायां परार्थानुमानतयोपयोगः ॥३.४.१॥
कथा वाद एव, न वाद-जल्प-वितण्डाभेदात् त्रिधा ॥३.४.२॥
साधनदूषणवचनं वादः ॥३.४.३॥
प्रतिपक्षधर्मव्यवच्छेदेन स्वेष्टधर्मस्थापनमस्य फलम् ॥३.४.४॥
विजिगीषोत्थेऽस्मिन् वादि-प्रतिवादि-सभ्य-सभापतयश्चत्वारोऽङ्गानि, अन्यत्र वादि-प्रतिवादिनौ क्वचित् सभ्योऽपि ॥३.४.५॥
वादि-प्रतिवादिनौ प्रारम्भक-प्रत्यारम्भकौ ॥३.४.६॥
तौ जिगीषु-तत्त्वनिर्णिनीषुभेदात् प्रत्येकं द्विधा ॥३.४.७॥
तत्त्वनिर्णिनीषुः स्वात्मनि परत्र चेति द्विधा ॥३.४.८॥
वादिप्रतिवादिसिद्धान्ताभिज्ञत्व-माध्यस्थ्यादिगुणवानुभयाभिमतः सभ्यः ॥३.४.९॥
प्रज्ञाज्ञैश्वर्यादिगुणवान् सभापतिः ॥३.४.१०॥
प्रमाणतः स्वपक्षस्थापन-परपक्षखण्डने वादि-प्रतिवादिनोः, तयोर्वादस्थानक-कथाविशेषाङ्गीकारकरणा-ऽग्रवादोत्तरवादनिर्देशादिकं सभ्यस्य, वाद्याद्य-भिहितावधार-कलहव्यपोहादिकं सभापतेश्च कर्म ॥३.४.११॥
सजिगीषुके वादे यावत्सभ्यापेक्षमन्यत्र च यावत्तत्वनिर्णयं यावत्स्फूर्त्ति च वक्तव्यमिति ॥३.४.१२॥

॥ इति तृतीयाध्याये तुर्यः पादः ॥

॥ इति [नय-निक्षेप-वादनिरूपणाख्यः] तृतीयोऽध्यायः समाप्तः ॥

## ॥ अथ चतुर्थोऽध्यायः ॥

अस्तित्वनास्तित्वाद्यनन्तधर्मात्मकं वस्तु तत्त्वम् ॥४.१.१॥
तद् द्रव्य-पर्यायाभ्यां द्विधा ॥४.१.२॥
नाऽभावस्तत्त्वान्तरं, प्रागभावादिचतुर्विधस्याऽपि तस्य भाव एवाऽन्तर्भावात् ॥४.१.३॥

यन्निवृत्तावेव यस्योत्पत्तिः स ह्यस्य प्रागभावः ॥४.१.४॥
यदुत्पत्तौ यस्य प्रच्युतिः स तस्य प्रध्वंसः ॥४.१.५॥
स्वभावान्तरात् स्वभावव्यवच्छेदोऽन्योन्याभावः ॥४.१.६॥
कालत्रयेऽपि तादात्म्यपरिणामनिवृत्तिरत्यन्ताभावः ॥४.१.७॥
समवायो नाऽविष्वग्भावाद् व्यतिरिक्तोऽसिद्धेः ॥४.१.८॥
विशेषस्त्वन्त्यो निष्प्रमाणकः ॥४.१.९॥
अन्यः पर्याये ॥४.१.१०॥
तिर्यगूर्ध्वतासामान्यभेदतो द्विविधमपि सामान्यमनतिरिक्तम् ॥४.२.११॥
प्रतिव्यक्ति तुल्या परिणतिस्तिर्यक्सामान्यं पर्याय एव, पूर्वापरपर्यायानुगामी वस्त्वंश ऊर्ध्वतासामान्यं द्रव्यमेव ॥४.१.१२॥
गुणवद् द्रव्यम् ॥४.१.१३॥
न समवायिकारणमसिद्धेः ॥४.१.१४॥
पर्यायवत्त्वन्तु द्रव्य-गुणयोः समानम् ॥४.१.१५॥
प्रत्यभिज्ञानादितस्तु न तत्सिद्धिरिति ॥४.१.१६॥

॥ इति चतुर्थाध्याये प्रथमः पादः ॥

धर्मा-ऽधर्मा-ऽऽकाश-काल-जीव-पुद्गला द्रव्याणि ॥४.२.१॥
धर्मा-ऽधर्मा-ऽऽकाश-जीव-पुद्गलानामस्तिकायत्वं समानम् ॥४.२.२॥
कालस्याऽप्यस्तिकायत्वमित्येके ॥४.२.३॥
गत्युपष्टम्भको धर्मः ॥४.२.४॥
न देशविशेषस्य तत्त्वमननुगमात् ॥४.२.५॥
अस्याऽसङ्ख्यप्रदेशत्वं जीवा-ऽधर्माभ्यां समानम् ॥४.२.६॥
पुद्गलानां सङ्ख्येयानन्तप्रदेशत्वे च ॥४.२.७॥
आकाशस्याऽनन्तप्रदेशत्वमेव ॥४.२.८॥
स्थित्युपष्टम्भकोऽधर्मः ॥४.२.९॥
अस्य कृत्स्नलोकाकाशावगाहो धर्मेण समानः ॥४.२.१०॥
अवगाहोपष्टम्भकमाकाशम् ॥४.२.११॥
तल्लोका-ऽलोकाभ्यां द्विधा ॥४.२.१२॥
धर्मा-ऽधर्माद्यधिकरणं लोकः ॥४.२.१३॥

स चतुर्दशरज्जुमानोऽसङ्ख्यातप्रदेशः ॥४.२.१४॥
तद्विपरीतोऽलोकोऽनन्तः ॥४.२.१५॥
एकद्रव्यत्वनिष्क्रियत्वं धर्मा-ऽधर्माभ्यां समानम् ॥४.२.१६॥
वर्त्तनादिलिङ्गकः कालोऽनन्तसमयः ॥४.२.१७॥
तस्य द्रव्यत्वं नेत्यपरे इति ॥४.२.१८॥

॥ इति तुर्याध्याये द्वितीय पादः ॥

उपयोगवान् जीवः ॥४.३.१॥
उपयोगः साकारोऽनाकारश्च ॥४.३.२॥
आद्यो ज्ञानं द्वितीयो दर्शनम् ॥४.३.३॥
संसारी मुक्तश्च जीवः ॥४.३.४॥
आद्यः सकर्मा ॥४.३.५॥
स त्रस-स्थावराभ्यां द्विधा ॥४.३.६॥
आद्यः तेजोवायुद्वीन्द्रियादिपञ्चेन्द्रियान्तः ॥४.३.७॥
पृथिव्यब्वनस्पतिभेदादन्त्यस्त्रिधा ॥४.३.८॥
नाऽसौ निष्क्रियो, गतिमत्त्वात् ॥४.३.९॥
गतिरविग्रहा विग्रहा च ॥४.३.१०॥
न नित्य एव, जन्मान्यथानुपपत्तेः ॥४.३.११॥
गर्भोपपात-सम्मूर्च्छनभेदात् त्रिधा जन्म ॥४.३.१२॥
न समनस्क एव, अमनस्कस्याऽपि सद्भावात् ॥४.३.१३॥
नाऽसङ्गः, शरीरित्वानुपपत्तेः ॥४.३.१४॥
शरीरञ्चौदारिक-वैक्रिया-ऽऽहारक-तैजस-कार्मणभेदात् पञ्चविधम् ॥४.३.१५॥
असङ्गत्वे आस्त्रवोऽपि नोपपद्यते ॥४.३.१६॥
स हि काय-वाङ्-मनःकर्मयोगः ॥४.३.१७॥
तदभावे बन्धोऽप्यनुपपन्नः ॥४.३.१८॥
कर्मयोग्यपुद्गलग्रहणं हि सः ॥४.३.१९॥
मिथ्यादर्शना-ऽविरति-प्रमाद-योगास्तस्य कारणानि ॥४.३.२०॥
तदभावे प्रकृति-स्थित्यनुभाव-प्रदेशबन्धा अपि विशेषा अनुपपन्नाः ॥४.३.२१॥
प्रकृत्यभावे ज्ञानावरण-दर्शनावरण-वेदनीय-मोहनीयाऽऽयुष्क-नाम-गोत्रा-ऽन्तराया

अपि तद्विशेषास्तद्विशेषाश्च तथा ॥४.३.२२॥
एवं स्थित्याद्यभावे ॥४.३.२३॥
आस्रवनिरोधात्मा संवरोऽपि ॥४.३.२४॥
तत्साधनानि गुप्ति-समिति-धर्मा-ऽनुप्रेक्षा-परीषहजय-चारित्राण्यपि ॥४.३.२५॥
निर्जराऽपि ॥४.३.२६॥
तत्साधनं तपोऽपि ॥४.३.२७॥
अनशना-ऽवमौदर्य-वृत्तिपरिसङ्ख्यान-रसपरित्याग-विविक्तशय्यासन-कायक्लेश-भेदात् षड्विधं बाह्यम् ॥४.३.२८॥
प्रायश्चित्त-विनय-वैयावृत्त्य-स्वाध्याय-व्युत्सर्ग-ध्यानभेदात् षड्विधमभ्यन्तरम् ॥४.३.२९॥
एकान्तनित्यत्वे त्वस्य व्रतमनुपपन्नम् ॥४.३.३०॥
हिंसा-ऽनृत-स्तेया-ऽब्रह्म-परिग्रहेभ्यो विरमणं हि तत् ॥४.३.३१॥
तत्त्वे देव-मनुष्य-नरक-तिर्यग्गतयोऽपि न स्युः ॥४.३.३२॥
परिणाम्यसौ ॥४.३.३३॥
निरावरणो मुक्तः ॥४.३.३४॥
अशेषकर्मक्षयः परमानन्दो वा मुक्तिः ॥४.३.३५॥
सम्यग्दर्शन-ज्ञान-चारित्राणि तत्साधनमिति ॥४.३.३६॥

॥ इति तुर्याध्याये तृतीयः पादः ॥

मूर्त्तिमान् पुद्गलः ॥४.४.१॥
रूपं मूर्त्तिः, स्पर्शरसगन्धास्तन्नियताः ॥४.४.२॥
अतः शरीर-वाङ्-मनः-प्राणापान-सुख-दुःख-जीवितमरणोपग्रहाः ॥४.४.३॥
शब्द-बन्ध-सौक्ष्म्य-स्थौल्य-संस्थानभेद-तमश्छायाऽऽतपोद्योता इदमीयाः ॥४.४.४॥
एतेनाऽऽकाशगुणत्वादिकं प्रत्युक्तम् ॥४.४.५॥
अजघन्यगुणानां स्निग्धरूक्षाणां गुणवैषम्ये द्व्यधिकादिगुणानां सदृशानाञ्च बन्धो, न गुणसाम्ये ॥४.४.६॥
देश-प्रदेश-स्कन्धा-ऽणुभेदतः स चतुर्द्धा ॥४.४.७॥
स्कन्धसम्बद्धः स्कन्धो देशो द्विप्रदेशादिः ॥४.४.८॥
निरंशः स्कन्धसम्बद्धोंऽशः प्रदेशः ॥४.४.९॥
देशतानापन्नः सङ्घातः स्कन्धः ॥४.४.१०॥

प्रदेशतानापन्नो निरंशोंऽशोऽणुः ॥४.४.११॥
सङ्घातभेदेभ्यः स्कन्धस्य, भेदादणोरुत्पत्तिः ॥४.४.१२॥
पर्यायः सहभावि-क्रमभाविभेदाद् द्विधा ॥४.४.१३॥
आद्यो गुणः ॥४.४.१४॥
स सामान्य-विशेषाभ्यां द्विधा ॥४.४.१५॥
अस्तित्व-प्रमेयत्वादिः सामान्यगुणः ॥४.४.१६॥
वर्ण-ज्ञानादिर्विशेषगुणः ॥४.४.१७॥
अन्त्यः पर्यायोऽनन्त एव ॥४.४.१८॥
उत्पादव्ययध्रौव्यलक्षणं सत्त्वं सर्वेषाम् ॥४.४.१९॥
तस्मादनेकान्तात्मकत्वमेव कान्तमिति ॥४.४.२०॥

॥ इति [तत्त्वनिरूपणाख्यः] चतुर्थोऽध्यायः ॥

॥ इति श्रीअनेकान्ततत्त्वमीमांसा ॥

* * *

C/o. श्रीनेमिसूरि स्वा. मन्दिर
१२, भगतबाग सो.
पालडी, अम.-७